देवताभेदे चक्रविचारस्यावश्यकत्वमाह वाराहीतन्त्रे यामलादौ च ।
“तारशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च ।
राशिशुद्धिस्त्रिपुरे च गोपाले ऽकडमः स्मृतः ॥
अकडमो वामने च गणेशे च तथैव च ।
कोष्ठचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम् ॥
नामादिचक्रे सर्व्वेषां भूतचक्रे तथैव च ।
त्रैपुरं तारचक्रे तु शुद्धमन्त्रं जपेद्बुधः ॥”
तथा ।
“वैष्णवं राशिसंशुद्धं शैवचाकडमं स्मृतम् ।
कालिकायाश्च तारायास्तारचक्रं शुभावहम् ॥
चण्डिकायास्तारकोष्ठे गोपाले ऽकडमः स्मृतः ।
हरचक्रे सर्व्वमन्त्रं धनाधिक्ये न चाश्रयेत् ॥
ऋणाधिक्ये शुभं विद्यात् धनाधिक्ये च नो विधिम् ।
दोषान् संशोध्य गृह्णीयाच्छध्यदेशोद्भवस्य च ॥
मन्त्रस्त्वृणी शुभफलोऽप्यशुभो धनी च
तुल्यं यदा समफलः कथितो मुनीन्द्रैः ॥”
अन्यत्रापि ।
“शून्ये मृत्युमवाप्नोति धने च विफलं भवेत् ।
ऋणी च प्राप्निमाप्नोति सर्व्वसिद्धिस्तु जायते ॥”
अथ मन्त्राणां दश संस्काराः । गौतमीये ।
“जननं जीवनं पश्चात् ताडनं बोधनन्तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।
स्वर्णादिपात्रे संलिख्य मातृकायन्त्रमुत्तमम् ।
काश्मीरचन्दनेनापि भस्मना वाथ सुव्रत ! ॥
काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मातृकायन्त्रलेखने ॥
मन्त्राणां मातृकायन्त्रादुद्धारो जननं स्मृतम् ।
पंक्तिक्रमेण विधिना सुनिभिस्तच्च निश्चितम् ॥१॥
व्योमेन्दौ रसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केशरं
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम् ।
आशास्वश्रिषु लान्तलाङ्गलियुजा क्षौक्षौपुरेणावृतं
यन्त्रं सर्व्वतनोः परं निगदितं सौभाग्यसम्पत्करम् ॥”
यन्त्रस्य दिक्षु वं विदिक्षु ठं लिखेत् । तथा च गौतमीये ।
“कादिमान्ताः पञ्चवर्गा दिक्षु पूर्व्वादितो न्यसेत् ।
यादिवान्ताः शादिहान्ता लक्षमीशे प्रविन्यसेत्॥
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च ॥”
इति मातृकायन्त्रम् ॥
“प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः ।
प्रत्येकं शतवारन्तु जीवनन्तदुदाहृतम् ॥ २ ॥
मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा ।
प्रत्येकं वायुबीजेन पूर्व्ववत्ताडनं मतम् ॥ ३ ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ।
तन्मन्त्रवर्णसंख्यातैर्हन्याद्रेफेण बोधनम् ॥” ४ ॥
“तत्तन्मन्त्रोक्तविधिना अभिषेकः प्रकीर्त्तितः ।”
तन्त्रान्तरे ।
“मन्त्रस्य चासुकं वर्णमभिषिञ्चामि चक्रतम् ।”
इति वचनात् प्रत्येकमभिषिञ्चेत् ।
“अश्वत्थपल्लवैः सिञ्चेत् मन्त्री मन्त्रार्णसंख्यया ॥५॥
सञ्चिन्त्य मनसा मन्त्रं सुषुम्णामूलमध्यतः ।
ज्योतिर्मन्त्रेण विधिवत् दहेन्मलत्रयं यती ॥
तारं व्योमाग्निमनुयुक् दण्डी ज्योतिर्मनुर्मतः ॥”
तारं प्रणवः व्योम हकारः अग्नी रेफः मनुरौकारः दण्डी अनुस्वारः ॥ ६ ॥
“स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ।
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥७॥
मन्त्रेण वारिणा मन्त्रे तर्पणं तर्पणं मतम् ।
मधुना शक्तिमन्त्रेषु वैष्णवे चेन्दुमज्जलैः ॥
शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितम् ॥”
अभिषेकेऽपि तथा ॥ ८ ॥
“तारमायारमायोगो मनोर्द्दीपनमुच्यते ॥ ९ ॥
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥१०॥
संस्कारा दश संप्रोक्ताः सर्व्वतन्त्रेषु गोपिताः ।
यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नुयात् ।”
मलत्रयमिति आनवं मायिकं कार्म्मणञ्च ।
प्रपञ्चसारे ।
“मायिकं नाम योषोत्थं पौरुषं कार्म्मणं मलम् ।
आनवं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥”
न नवं अनवं तस्य भावः आनवं वृद्धत्वमित्यर्थः ।
तारमायारमायोग इति । तारमायारमाबीजपुटितम् मन्त्रमष्टोत्तरशतं जपेत् इत्यर्थः ।
तथा च विश्वसारे ।
“तारमायारमाबीजपुटितेन मनुं जपेत् ।
शतमष्टोत्तरञ्चैव दीपयेत् साधकोत्तमः ॥” * ॥
अथ दुर्गामन्त्रः ।
“अथ दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
मायादिः कर्णबिन्द्वाढ्यो भूयोऽसौ सर्गवान् भवेत् ॥
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिहृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः ॥”
अद्रिरीकारः । कर्ण उकारः । पञ्चान्तको गकारः । प्रतिष्ठा आकारः । मारुतो यकारः ।
भौतिक ऐकारः । ॐ ह्रीं दुं दुर्गायै नमः ॥*॥
अथ विष्णुमन्त्रः ।
“तारं नमःपदं ब्रूयात् नरौ दीर्घसमन्वितौ ।
पवनो णायमन्त्रोऽयं प्रोक्तो वस्वक्षरः परः ॥”
ॐ नमो नारायणाय ॥ * ॥ अथ शिवमन्त्रः ।
“सान्तमौकारसंयुक्तं बिन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनुः ॥”
हौं ॥ * ॥ अथ गणेशमन्त्रः ।
“पञ्चान्तकं शशिधरं बीजं गणपतेर्व्विदुः ॥”
पञ्चान्तको गकारः । गं ॥*॥ अथ सूर्य्यमन्त्रः ।
“तारो घृणिर्भृगुः पश्चाद्दामकर्णविभूषितः ।
वह्न्यासनो मरुत्शैयः सनेत्रोऽद्रिस्त्वपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥”
ॐ घृणि सूर्य्य आदित्य ॥ * ॥
पञ्चदेवतानामेक एको मन्त्रो लिखितः । एतासामन्यासाश्चान्यमन्त्रा ग्रन्थविस्तारभयान्न लिखिताः ॥ कलावागमोक्तमन्त्रजपविधिर्यथा,—
“आगमोक्तविधानेन कलौ मन्त्रं जपेत् सुधीः ।
नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥”
तथा ।
“कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥
मन्त्राणां देवताः प्रोक्ता देवता गुरुरूपिणी ।
तेषां भिदा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥”
पित्रादितो मन्त्रग्रहणनिषेधो यथा,—
“पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्वेन वरारोहे ! न च सा कन्यका भवेत् ॥”
तथा गणेशविमर्षिण्याम् ।
“यतेर्द्दीक्षा पितुर्द्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका ॥”
इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः । इति तन्त्रसारः ॥ ( ज्वरादिनाशकमन्त्रो यथा,—
“वानराकृतिमालिख्य खटिकाभिः पुनः स्वयम् ।
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेद्भिषजां वरः ॥
मन्त्रः ।
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्व्याहिक-त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर-शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां दह दह हन हन पच पच अवतर अवतर किलिकिलि वानरराजज्वराणां बन्ध बन्ध ह्रां ह्रीं हूं फट् स्वाहा ।” इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥ )

मन्त्रकृत्, पुं, ( मन्त्रं कृतवान् । मन्त्र + कृ + क्विप् । तुगागमश्च ।) मन्त्री । मन्त्रणाकारकः । इति सिद्धान्तकौमुदी ॥ ( दौत्यकारी । यथा, श्रीमद्भागवते । ३ । १ । २ ।
“यदा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥”
“मन्त्रकृत् दौत्यकर्त्ता सन् ।” इति तट्टीकायां श्रीधरस्वामी ॥*॥ त्रि, मन्त्रप्रयोगकारी । यथा, रघुवंशे । १ । ६१ ।
“तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥”
“मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा ।” इति तट्टीकायां मल्लिनाथः ॥ )

मन्त्रगण्डकः, पुं, ( मन्त्रप्रधानो गण्डकः मध्यपदलोपी कर्म्मधारयः । ) विद्या । इति हारावली । १९६ ॥